## शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

मम्मटोक्त काव्य लक्षणे अनलङ्कृती पुनः क्वापि पदस्य विश्लेषणं विशदं प्रतिपादनम्।

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।

उक्त काव्य लक्षणे 'अनलङ्कृती पुनः क्वापि' इति यदुक्तं तदपि न युक्तियुक्तम्। अस्यार्थः - सर्वत्र सालङ्कारौ क्वचित्तु अस्फुटालङ्कारावपि शब्दार्थौ काव्यमिति। तत्र सालङ्कारशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात् न तु स्वरूपाधायकत्वम्। यत्तु क्वचिदस्फुटालङ्कारे उदाहृतम् —

> 'यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
> स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
> सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
> रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥' इति।

एतच्चिन्त्यम्। अत्र हि विभावना विशेषोक्ति मूलस्य सन्देह सङ्करालङ्कारस्य स्फुटत्वम्।

वस्तुतस्तु 'यः कौमारहरः' इत्यत्र न कश्चन स्फुटोऽलङ्कारः। कारणाभावे कार्योत्पत्तिरूपस्य विभावनाऽलङ्कारस्य न स्फुटता। यतः उत्कण्ठाया कारणानि भावमुखेनैव वर्णितं न त्वभावमुखेन। एवं कारणसत्त्वेऽपि कार्यानुत्पत्तिरूपाया विशेषोक्तेरपि न स्फुटता। अर्थादत्र कारणकार्ययोरभाव-कथनस्य अभावस्य सत्त्वेऽपि तद्वाचकनञादिनाऽनुपात्तत्वात्। यदि चेतोऽनुत्कण्ठितं नैवाभिधीयेत तदा विशेषोक्तेः स्फुटत्वं भवेत्। अत्र उभयोरस्फुटत्वेन तन्मूलक सन्देहसङ्करोऽपि अस्फुटः इति निर्विवादम्।

---

उपेन्द्र झा
28/9/20
असि० प्रो० साहित्य
रा० उ० सं० महावि०
कुरुक्षेत्र, हरियाणा

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
साहित्यदर्पणः षष्ठः परिच्छेदः

---

दृश्य काव्यस्य स्वरूपमुल्लिख्य अभिनयस्य च लक्षणमभिधाय तद्भेदांश्च प्रदर्श्य रूपकाणि कति उपरूपकाणि च कति? इति विवेचनम्।

दृश्य श्रव्यत्व भेदेन काव्यं द्विविधम्। दृश्यं दर्शनीय प्रधानम्, श्रव्यं च श्रोतव्यं मात्रम्। तत्र अभिनय योग्यं काव्यं दृश्यं भवति। तदेव दृश्यं काव्यं नटे रामादि स्वरूपाणाम् आरोपाद् रूपकमुच्यते। उक्तञ्च मन्दारमरन्दे —

'यथा मुखादौ पद्माद्यारोपो रूपकं मतम्।
तथैव नायकारोपो नटे रूपकमुच्यते॥' इति

ननु को नामाभिनयः? अत्राह - नटैरङ्गादिभिः रामयुधिष्ठिरादीनाम् अवस्थानुकरणम् अभिनयः। स च चतुर्विधो भवति - आङ्गिको, वाचिकः आहार्यः, सात्त्विकश्चेति। उक्तं च साहित्यदर्पणे -

'भवेदभिनयोऽवस्थानुकारः स चतुर्विधः।
आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा॥' इति

तत्र अङ्गेन निष्पन्नः आङ्गिकः। वचसा प्रतिपाद्यो वाचिकः, आहरणीय वेष रचनानिष्पाद्य आहार्यः, स्तम्भस्वेदादि निष्पाद्यः सात्त्विकः।

तच्च दृश्यं काव्यं रूपकोपरूपक भेदेन द्विविधम्। तत्र रूपकं दशविधम्। तद्यथा - नाटकम्, प्रकरणम्, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथि, प्रहसनं चेति। उपरूपकम् च अष्टादश विधम्। तद्यथा - नाटिका, त्रोटकम्, गोष्ठी, सट्टकम्, नाट्यरासकम्, प्रस्थानम्, उल्लाप्यकम्, काव्यं, प्रेङ्खणम्, रासकम्, श्रीगदितम्, शिल्पकम्, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका चेति दिक्।

उपेन्द्र झा
28/9/20
सहा० प्रो० साहित्य
स० उ० सं० महावि०
कुरकेला, पूर्णियाँ

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पण: दशम: परिच्छेद:

निर्दुष्टालङ्कार लक्षणं निरूप्य काव्ये तस्य किं प्रयोजनम्? इति प्रतिपादनम्।

आचार्य विश्वनाथेन स्व साहित्य दर्पणस्य दशमे अध्याये काव्ये अलंकारस्य प्रयोजनम् एवञ्च तस्य भेदस्य भूयसी वर्णनं कृतम्। अलंक्रियतेऽनेनेति अलंकार:। अर्थात् रसाद्युत्कर्ष जनकत्वे सति अतिशय शोभातिशायि काव्य धर्मत्वम् अलंकारत्वम्। उक्तं च साहित्यदर्पणे- 'शब्दार्थयोरस्थिरा ये धर्मा: शोभातिशायिन:। रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत्' ॥ इति

यथा अङ्गदादय: शरीर शोभातिशायिन: शरीरिणम् उपकुर्वन्ति तथा काव्ये अनुप्रासोपमादय: अलंकारा: शब्दार्थ शोभातिशायिनो रसादेरुपकारका: भवन्ति। अलंकारा: अस्थिरा: सन्ति नैषां गुणवत् आवश्यकी स्थिति:। अर्थात्- गुणा: अपि रसोत्कर्षका: भवन्ति, किन्तु ते रसस्य स्थिरा धर्मा: स्वरूप विशेषा: सन्ति। अलंकाराश्च शब्दार्थयोरस्थिरा धर्मा: शब्दार्थद्वारेण च रसं उत्कर्षयन्ति। इदमेव चैषां प्रयोजनम् यत् शब्दार्थद्वारेण रसादे: उपकारकत्वम्।

अलमतिविस्तरेण।

---

उपेन्द्र झा
28/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
फुलकेला, पूर्णिया